# श्रीमद्भगवद्गीताष्टावधानकार्यक्रमः




श्रीमद्भगवद्गीतायाः अष्टावधानम् एकप्रकारकं धारणासम्बद्धावधानम् । अत्र अष्टौ प्रक्रियाः यथा — श्लोककथनम्, सङ्ख्याकथनम्, पादपूरणम्, अखण्डपठनम्, श्लोकसंख्या, अन्त्याक्षरी, अक्षरदर्शनम्, अप्रस्तुतप्रसङ्गः इति भवन्ति । भगवद्गीताश्लोककथनम्, अध्यायशः श्लोकानां संख्यास्मरणम् । विलोमपठननैपुण्यम्, अध्यायशः श्लोकशः अक्षराणां स्मरणम्, अखण्डपठने धारा, अप्रस्तुतप्रसङ्गे वाक्चातुर्यं चमत्कारवाक्कौशलञ्च नितान्तमपेक्षते । अतः तादृशस्य अवधानस्य कर्तारः विरलाः भवन्ति । राष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागे सहायकाचार्यरूपेण कार्यं कुर्वाणः **डॉ.सच्चिदानन्दमूर्त्तिमहोदयाः** आवासीयशिक्षणरूपेण छात्रेभ्यः गीतावधानप्रशिक्षणं प्रयच्छन्ति । तेषु छात्रेषु श्री उमामहेश्वरः अन्यतमः ।

संस्कृतनवरात्रमहोत्सवं समुपलक्ष्य चतुर्थदिने १७.०८. २०१९ तमे दिनाङ्के श्रीमद्भगवद्गीतावधानकार्यक्रमः समायोज्यत। कार्यक्रमस्यास्य अध्यक्ष्याः प्रो.एम्.एल्.एन्.मूर्त्तिमहोदया आसन् । अमुष्मिन् कार्यक्रमे शास्त्रिप्रथमवर्षीयच्छात्रः य.उमामहेश्वररावः श्रीमद्भगवद्गीतावधानमकार्षीत् । अवधानेऽस्मिन् चतस्रः आवृत्तय आसन् । यत्र च अष्टप्रक्रियाणाम् अष्टौ प्राश्निकाः तत्तत्प्रक्रियानुसारेण अप्राक्षुः । अभिख्या, श्रीविद्या, ममता, कृष्णवेणी, शङ्करः, सुकान्तः, शैलेषः, लक्ष्मीनारायणश्चैमे प्राश्निकाः आसन् । अप्रस्तुतप्रसङ्गः कार्यक्रमस्य रञ्जकः प्रक्रियाप्रकार आसीत् । अन्यासु च प्रक्रियासु अवधानिनः गीतायाः धारणाशक्तिं, धाराशक्तिम्, उच्चारणशैलीं च दृष्ट्वा सन्तुष्टाः सन्तः अध्यक्षाः अवधानिनः उमामहेश्वरस्य सम्माननमकुर्वन् । भगवद्गीतां सर्वेऽपि पठेयुः कण्ठस्थीकरणञ्च तस्याः कुर्युरिति उद्देश्येन एव एतादृशाः कार्यक्रमाः सञ्चाल्यन्ते इति ते अध्यक्षाः वदन्तोऽवधानिनः गीताशिक्षकाणां डॉ.सच्चिदानन्दमूर्त्तिमहोदयानां प्रशंसामभिनन्दनञ्च अकार्षुः । कार्यक्रमस्यास्य सञ्चालकाः डॉ.विद्वान् नारायणमहोदयाः, डॉ.यशस्विमहोदयाः, डॉ.एस. सच्चिदानन्दमूर्त्तिमहोदयाश्च आसन् ।